श्री विष्णु प्रातः स्मरण स्तोत्रं

श्री विष्णु प्रातः स्मरण स्तोत्रं

प्रातः स्मरामि फणिराजतनौ शयानं
नागामरासुरनरादिजगन्निदानं |
वेदैः सहागमगणैरुपगीयमानं
कांतारकेतनवतां परमं निधानं || 1 ||

प्रातर्भजामि भवसागरवारिपारं
देवर्षिसिद्धनिवहैर्विहितोपहारं |
संदृप्तदानवकदंबमदापहारं
सौंदर्यराशि जलराशिसुताविहारं || 2 ||

प्रातर्नमामि शरदंबरकांतिकांतं
पादारविंदमकरंदजुषां भवांतं |
नानाऽवतारहृतभूमिभरं कृतांतं
पाथोजकंबुरथपादकरं प्रशांतं || 3 ||

श्लोकत्रयमिदं पुण्यं ब्रह्मानंदेन कीर्तितं |
यः पठेत् प्रातरुत्थाय सर्वपापैः प्रमुच्यते || 4 ||

इति श्रीमत्परमहंस स्वामि ब्रह्मानंद विरचितं श्री विष्णु प्रातः स्मरण स्तोत्रं |